॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय १८

स तां परिवृतां दीनां निरानन्दां तपस्विनीम् ।
साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः ॥१॥

मां दृष्ट्वा नागनासोरुगूहमाना स्तनोदरम् ।
अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि ॥२॥

कामये त्वां विशालाक्षि बहुमन्यस्व मां प्रिये ।
सर्वाङ्गगुणसम्पन्ने सर्वलोकमनोहरे ॥३॥

नेह् के चिन्मनुष्या वा राक्षसाः कामरूपिणः ।
व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ॥४॥

स्वधर्मे रक्षसां भीरु सर्वथैष न संशयः ।
गमनं वा परस्त्रीणां हरणं सम्प्रमथ्य वा ॥५॥

एवं चैतदकामां च न त्वां स्प्रक्ष्यामि मैथिलि ।
कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥६॥

देवि नेह् भयं कार्यं मयि विश्वसिहि प्रिये ।
प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा ॥७॥

एकवेणी धराशय्या ध्यानं मलिनमम्बरम् ।
अस्थानेऽप्युपवासश्च नैतान्यौपयिकानि ते ॥८॥

विचित्राणि च माल्यानि चन्दनान्यगरूणि च ।
विविधानि च वासांसि दिव्यान्याभरणानि च ॥९॥

महार्हाणि च पानानि यानानि शयनानि च ।
गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि ॥१०॥

स्त्रीरत्नमसि मैवं भूः कुरु गात्रेषु भूषणम् ।
मां प्राप्य तु कथं हि स्यास्त्वमनर्हा सुविग्रहे ॥११॥

इदं ते चारुसञ्जातं यौवनं व्यतिवर्तते ।
यदतीतं पुनर्नैति स्रोतः शीघ्रमपाम् इव ॥१२॥

त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वकृत् ।
न हि रूपोपमा त्वन्या तवास्ति शुभदर्शने ॥१३॥

त्वां समासाद्य वैदेहि रूपयौवनशालिनीम् ।
कः पुमानतिवर्तेत साक्षादपि पितामहः ॥१४॥

यद्यत्पश्यामि ते गात्रं शीतांशुसदृशानने ।
तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते ॥१५॥

भव मैथिलि भार्या मे मोहमेनं विसर्जय ।
बह्वीनामुत्तमस्त्रीणां ममाग्रमहिषी भव ॥१६॥

लोकेभ्यो यानि रत्नानि सम्प्रमथ्याहृतानि मे ।
तानि ते भीरु सर्वाणि राज्यं चैतदहं च ते ॥१७॥

विजित्य पृथिवीं सर्वां नानानगरमालिनीम् ।
जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥१८॥

नेह् पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् ।
पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे ॥१९॥

असकृत्संयुगे भग्ना मया विमृदितध्वजाः ।
अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥२०॥

इच्छ मां क्रियताम् अद्य प्रतिकर्म तवोत्तमम् ।
सप्रभाण्यवसज्जन्तां तवाङ्गे भूषणानि च ।
साधु पश्यामि ते रूपं संयुक्तं प्रतिकर्मणा ॥२१॥

प्रतिकर्माभिसंयुक्ता दाक्षिण्येन वरानने ।
भुङ्क्ष्व भोगान्यथाकामं पिब भीरु रमस्व च ।
यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ॥२२॥

ललस्व मयि विस्रब्धा धृष्टमाज्ञापयस्व च ।
मत्प्रभावाल्ललन्त्याश्च ललन्तां बान्धवास्तव ॥२३॥

ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशश् च मे ।
किं करिष्यसि रामेण सुभगे चीरवाससा ॥२४॥

निक्षिप्तविजयो रामो गतश्रीर्वनगोचरः ।

व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा ॥ २५ ॥

न हि वैदेहि रामस्त्वां द्रष्टुं वाप्युपलप्स्यते ।
पुरो बलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम् ॥ २६ ॥

न चापि मम हस्तात्त्वां प्रासुमर्हति राघवः ।
हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगताम् इव ॥ २७ ॥

चारुस्मिते चारुदति चारुनेत्रे विलासिनि ।
मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥ २८ ॥

क्लिष्टकौशेयवसनां तन्वीमप्यनलङ्कृताम् ।
तां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ॥ २९ ॥

अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः ।
यावन्त्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥ ३० ॥

मम ह्यसितकेशान्ते त्रैलोक्यप्रवराः स्त्रियः ।
तास्त्वां परिचरिष्यन्ति श्रियमप्सरसो यथा ॥ ३१ ॥

यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च ।
तानि लोकांश्च सुश्रोणि मां च भुङ्क्ष्व यथासुखम् ॥ ३२ ॥

न रामस्तपसा देवि न बलेन न विक्रमैः ।
न धनेन मया तुल्यस्तेजसा यशसापि वा ॥ ३३ ॥

पिब विहर रमस्व भुङ्क्ष्व भोगान्
धननिचयं प्रदिशामि मेदिनीं च ।
मयि लल ललने यथासुखं त्वं
त्वयि च समेत्य ललन्तु बान्धवास्ते ॥ ३४ ॥

कुसुमिततरुजालसन्ततानि
भ्रमरयुतानि समुद्रतीरजानि ।
कनकविमलहारभूषिताङ्गी
विहर मया सह भीरु काननानि ॥ ३५ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com